National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 82-83
© 2025 NJHSR
www.sanskritarticle.com

**प्रज्ञापारमितापण्डा**
गवेषिका, विभागः साहित्यम्,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**प्रज्ञापारमितापण्डा**
गवेषिका, विभागः साहित्यम्,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# सिद्धान्तसुधायाः साहित्यिकपरिशीलनम्

**प्रज्ञापारमितापण्डा**

अलङ्कारशब्दः अलं कार इति द्वयोः शब्दयोः योगेन सिध्यति। यस्यार्थो भवति शोभाकारकः। अलङ्कारशब्दस्य व्युत्पत्तिः द्विधा क्रियते। तद्यथा –

क. अलङ्क्रियतेऽनेनेति अलङ्कारः तथा अलङ्करोतीति अलङ्कारः। अत्र प्रथमव्याख्यानुसारेण अलङ्कारस्य प्रतिष्ठा करणरूपेण सिद्ध्यति। काव्यस्वरूपाच्च तस्य पार्थक्यं दृश्यते।

ख. द्वितीयायां व्युत्पत्तौ अलङ्कारः काव्यस्य स्वरूपगतं तत्तत्त्वं यत् काव्यमलङ्करोति, अर्थात् अलङ्कारः काव्यस्यैव एकमङ्गभूतं वर्तते, यत् काव्यस्य सौन्दर्याधायकं तत्त्वमास्ते।

अलङ्कारवादिनः व्युत्पत्तिद्वयम् आश्रित्य यथास्थानम् आवश्यकतानुसारं च अलङ्कारस्य व्याख्यां कृतवन्तः, तस्य महत्त्वञ्च प्रदर्शितवन्तः। प्रसाधितोऽलङ्कृतश्च भूषितश्च परिष्कृतः। प्रसाध्यते स्म, अलङ्क्रियते स्म, परिष्क्रियते स्म।[1] अलङ्कारस्त्वाभरणं परिष्कारो विभूषणम्। मण्ड्यते अनेन भूष्यते अनेन इति।[2]

- **अलङ्कारस्वरूपम् –**

न कान्तमपि निर्भूषं विभाति वनिताननम्।[3] ऐतिहासिकदृष्ट्या च ज्ञायते यत् भामहाचार्य एव अलङ्कारसम्प्रदायस्य प्रथमाचार्यः प्रवर्तकश्च बभूव। अस्य अलङ्कारसम्प्रदायस्य प्रतिष्ठादायकाः पोषकाश्चाचार्याः दण्डि-उद्भट-रुद्रटेत्यादयः मन्यन्ते। अलङ्काराणां काव्ये समुपस्थितेः ज्ञानं विद्वद्भ्यो वैदिककालादेव आसीत्। अलङ्कारशब्दस्य प्रयोगः प्रचलनञ्च ऋग्वैदिककालात् दृष्टिपथमायाति। तत्र अलङ्कृतिः इति शब्दः अरङ्कृतिः इति शब्दरूपेण प्राप्यते। यथोक्तम् ऋग्वेदे –

**का ते अस्त्यरङ्कृतिः सूक्तैः कदा नूनं ते मघवन् दशेम॥**[4]

काव्यशास्त्रीयतत्त्वानां सूत्रपातः सर्वप्रथमं भरतमुनेः भवति। ततो भामह एव काव्यस्य सर्वाङ्गीणं विवेचनं प्रस्तुतवान्। भामहस्य मतानुसारेण यथा सुन्दरं सदपि कस्याश्चित् कामिन्याः मुखं भूषणैः विना न शोभते, तथैव काव्यशरीरस्य शोभापि काव्यालङ्कारैः एव भवति।[5] रुद्रट-उद्भटौ तु भामहस्य टीकाकारौ बभूवतुः। काव्येऽलङ्काराणां प्राधान्यं रुद्रट-उद्भट-दण्डि-प्रतिहारेन्दुराजादयः प्रतिपादया-मासुः। अलङ्कारसम्प्रदायस्य अलङ्काररहितं काव्यस्य स्वीकरणम् उष्णतारहिताग्नेः सेवनतुल्यं भविष्यति। तदेव जयदेवेनाप्युक्तम् –

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलङ्कृती॥**[6]

भरतमुनिना नाट्यशास्त्रे उपमा-रूपक-दीपक-यमकाख्यानां चतुर्णाम् अलङ्काराणां परिचयः सामान्येन उपस्थापितो वर्तते। तेषां चतुर्णामलङ्काराणां दृष्टान्त-निर्दशनादयः केचन अवान्तरभेदाश्च दिग्दर्शिताः। सर्वप्रथमं भामहेन घोषितं यत् अलङ्कारसाररहिता रचना काव्यं न भवितुमर्हति। तन्मते कटककुण्डलादयः विविधा अलङ्काराः यथा कामिन्याः शरीरं विभूषयन्ति, तथैव उपमानुप्रासादिभिः अलङ्कारैः कविताकामिन्याः शरीरस्य सौन्दर्यं वर्धते। काव्यस्य देहभूतधर्मौ शब्दार्थौ कथ्येते। अलङ्काराणां संयोजनेन शब्दार्थयोः शोभा बृद्धिमायाति। वामनमतेन अलङ्कारशब्दस्य अभिप्रायः काव्यस्वरूपपरः उपमाद्यलङ्कारपरश्च वर्तते। तदुक्तं तेन काव्यालङ्कारसूत्रवृत्तौ-

**अलङ्कृतिः अलङ्कारः। अलङ्कार-शब्दोऽयमुपमादिषु विवर्तते॥**[7]

वामनेन अलङ्कार पारमार्थिकरूपेण काव्यस्य अविभाज्यमङ्गं स्वीकृतम्। तद्यथा –

**काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारः॥**[8]

ध्वन्यालोककारः आनन्दवर्धनः अलङ्कारसम्प्रदायस्याचार्यैः प्रतिपादितम् अलङ्काराणाम् अङ्गित्वं खण्डितवान्। सः विलिखति यत् अलङ्काराणां विधानं रसादीनामङ्गरूपेण भवेत् न तु अङ्गिरूपेण। तदुक्तं ध्वन्यालोके –

**विवक्षा तत्परत्वेन नाङ्गित्वेन कदाचन॥**[9]

वक्रोक्तिसम्प्रदायस्य प्रवर्तकः कुन्तकः अलङ्कारं काव्यस्य उत्तमभूतमङ्गम् अमन्यत। अत एव कुन्तकः काव्यस्योपायतया अलङ्काराणां महत्त्वं स्वीकुर्वन् विलिखति-

**तदुपायतया तत्त्वं सालङ्कारस्य काव्यता॥**[10]

मम्मटस्य मतेन विश्वनाथस्य च मतेन अलङ्काराः शब्दार्थयोः शोभां वर्धयन्तः रसस्यैव उपकारकाः भवन्ति। ते यद्यपि शब्दार्थयोः नित्यधर्माः न भवन्ति तथापि काव्येऽलङ्काराः कटककुण्डल-हारादिसदृशाः रसोपकारकाः भवन्ति। तदुक्तं काव्यप्रकाशे मम्मटेन –

**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥**[11]

मम्मटमते काव्येऽलङ्काराभावेऽपि काव्यत्त्वस्य हानिः न भवति। यथा काव्यप्रकाशे काव्यस्य लक्षणं प्रतिपादयन् मम्मट आह –

**अनलङ्कृती पुनः क्वापि॥**[12]

इत्येवं प्रकारेण अलङ्कारसम्प्रदायस्य आचार्याः अलङ्कारं काव्यस्य स्वरूपाधायकं तत्त्वं कथयन्ति, ध्वनिवादिनश्च अलङ्कारं काव्यस्वरूपशोभासम्पादकं कथयन्ति।

आचार्यो भरतमुनिस्तु नाट्यशास्त्रे केवलं अलङ्कारचतुष्टयमेव स्वीकृतवान् तद्यथा – उपमा - दीपक – यमकाश्चेति। भामहस्तु - ३९, उद्भटः – ४०, रुद्रटः – ५२, मम्मटाचार्यस्तु – ६७, विश्वनाथः – ७७, जयदेवस्तु चन्द्रालोके १००, अप्पय्यदीक्षितः कुवलयानन्दे १२४ अलङ्कारान् वर्णितवान्। अनेन इदं स्पष्टं प्रतीयते यत् अलङ्काराणां संख्या तु क्रमेण वर्धिता।

काव्यशास्त्रस्य सूक्ष्मानुशीलनेन ज्ञायते यत् अलङ्कारशास्त्रेतिहासे काव्यात्मतत्त्वमधिकृत्य बहवो विवादाः प्रचलिताः बभूवुः। तत्र केचन रसमेव, अन्ये अलङ्कारान्, इतरे ध्वनिम्, अपरे वक्रोक्तिं, तदपरे रीतिं, तदन्ये च औचित्यमेव काव्यात्मत्वेन उररीकुर्वन्ति। त एव काव्यात्मविवादाः साम्प्रतम् अलङ्कारशास्त्रे सम्प्रदायरूपेण प्रचलिताः सन्ति।

ग्रन्थेऽस्मिन् ग्रन्थकारः सरसं मानवचरित्रं प्राकृतिकं दृश्यञ्च अवलम्ब्य सहजतया अयत्नेन उपमाप्रयोगं सहसैव विदधाति। रसाद्यनुगतः प्रकृष्टोऽक्षरविन्यास अनुप्रासः। अथवा स्वराणां वैधर्म्ये सत्यपि व्यञ्जनानां सादृश्यम् अनुप्रासः कथ्यते।

परोक्षरूपेण मलयानिल-चञ्चलदल' इति प्रकृति-नार्य्योः आचरणम् उपमास्वरूपत्वेन उपस्थापितम्।

**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**
**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च॥**

श्लोकेऽस्मिन् प्रधानतः द्वयोः अलङ्कारयोः प्रयोगो दृश्यते। एकस्तावत् उपमालङ्कारः अपरश्चास्ति अनुप्रासालङ्कारः। अग्निर्यथैको भुवनं प्रविष्टो – अग्निः यथा एको भूत्वा सर्वत्र प्रविष्टः सन्नपि भिन्नं रूपं धत्ते। एतना तुलनया एवात्र उपमालङ्कारो जातः।

**ग्रन्थसूची –**


१.काव्यप्रकाशः (मम्मटविरचितम्) (प्रथमादिषष्ठोल्लासान्तः); अनु. विमलाकान्त-मुखोपाध्यायः, सम्पा. विपदभञ्जनपालः, संस्कृत-पुस्तकभाण्डार, कोलकाता, १४२७ (प्रथमप्रकाशः) ।

२.काव्यादर्शः(दण्डीविरचितम्) (प्रेमचन्द्रतर्कवागीशभट्टाचार्यविरचित मालिन्यप्रोञ्छनी टीका सहित) ; सम्पा. चिन्मयी चट्टोपाध्याय, कोलकाता, पश्चिमवङ्ग राज्यपुस्तक पर्षद्, १९९५ ।

३.काव्यालङ्कारसूत्रवृत्तिः (वामनविरचितम्) (कामधेनु व्याख्या-सहित, विद्याधरी हिन्दी-व्याख्योपेतम्); व्याख्या. केदारनाथशर्मा, चौखम्बा-कृष्णदास-अकादमी, वाराणसी।

४.ध्वन्यालोकः (आनन्दवर्धनविरचितम्); (श्रीमदभिनवगुप्तपादविर-चित 'लोचन' सहितः 'भावप्रकाशिका' हिन्दीटीकोपेतश्च) ; सम्पा. शिवप्रसाद द्विवेदी (श्रीधराचार्य), चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१३ (प्रथमप्रकाशः) ।

५.स्वामिनारायणसिद्धान्तसुधा, परब्रह्मस्वामिनारायणप्रबोधितम्, अक्षरपुरुषोत्तमदर्शनम्, ग्रन्थकारः, महमहोपाध्यायः साधुभद्रेश-दाशः, स्वामिनारायण अक्षरपीठ अमदावाद


**पादटिप्पणी –**

1 अमरकोषे २.१००, पृ.सं. २३८ मनुष्यवर्गः

2 तत्रैव २.१०१, पृ.सं. २३८

3 काव्यालङ्ककारे १.१६

4 ऋग्वेदे ३.२९.३

5 काव्यालङ्ककारे १.१३

6 चन्द्रालोके १.८

7 काव्यालङ्कारसूत्रवृत्तौ १.१२

8 काव्यालङ्कारसूत्रे १.१-२

9 ध्वन्यालोके २.१९

10 वक्रोक्तिजीविते २.६

11 काव्यप्रकाशे ६.६७

12 तत्रैव